International Journal of Sanskrit Research 2019; 5(4): 145-149

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 145-149
© 2019 IJSR
www.anantaajournal.com
Received: 16-05-2019
Accepted: 18-06-2019

**डा. राघवेन्द्रभट्टः**
अध्यक्षः, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्,
राजीवगान्धीपरिसरः ,शृङ्गेरी,
कर्नाटक, भारत

**Correspondence**
**डा. राघवेन्द्रभट्टः**
अध्यक्षः, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्,
राजीवगान्धीपरिसरः ,शृङ्गेरी,
कर्नाटक, भारत

# उत्तररामचरिते दार्शनिकविचारः

**डा. राघवेन्द्रभट्टः**

काव्यं दृश्यं श्रव्यञ्चेति द्विविधम्। दृश्यं नाटकादिदशविधम्। श्रव्यम् पद्यं गद्यं चम्पूश्चेति त्रिविधम्। तत्र पद्यं महाकाव्यं खण्डकाव्यं मुक्तकञ्चेति त्रिविधम्। कथा आख्यायिका निबन्धश्चेति गद्यं त्रिविधम्। एवं नानाभेदात्मकतया काव्यस्य सृष्टिः कविभिः कृता ।
सदुपदेशस्य वेदादिशास्त्रमार्गः पुराणमार्गः काव्यमार्गश्चेति त्रयो मार्गा लोके प्राधान्यमावहन्ति । स्त्रीपुंधर्माः, आश्रमधर्माः, विहितकर्माणि तेषामनुष्ठानम्, निषिद्धकर्माणि तेषां त्यागः, धर्मार्थकाममोक्षप्राप्त्युपायाश्च वेदशास्त्रमार्गेण प्रभुसम्मिततयोपदिश्यन्ते। त एव पुराणैः मित्रसम्मिततया, काव्यैः कान्तासम्मिततया च उपदिश्यन्ते। मम्मटः यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे इति वचनेन काव्यं सप्रयोजनकमाह। तत्र उपदेशः काव्यस्य विशिष्टं प्रयोजनम् । काव्योपदेशः कान्तोपदेशतुल्यः। सुकुमारमतयोऽतिसुखस्वभावा राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्तयितुमशक्या अन्ये च मन्दमतयो विवेकबोधाय शास्त्रादौ प्रवर्तयितुमशक्याः। काव्यं कान्तेव सरसतापादनेन अभिमुखीकृत्य तान् उपदेशं ग्राहयति, गुडजिह्विकया शिशूनौषधमिव। तदुक्तम्

> स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते।
> प्रथमालीढमधवः पिबन्ति कटु भेषजम्॥ इति।

अश्लीलार्थाभिधेयत्वान्नोपपदेष्टव्यं काव्यम्, ऋष्यप्रणीतत्वादनुपादेयं काव्यम्, दृष्टप्रयोजनाभावान्नोपदेष्टव्यं काव्यम्, अदृष्टप्रयोजनाभावान्नोपदेष्टव्यं काव्यम् कल्पितार्थाभिदायित्वान्नोपदेष्टव्यं काव्यम्, असदर्थाभिधायित्वान्नोपदेष्टव्यं काव्यम्, काव्यालापांश्च वर्जयेत्, इत्यादिभिर्वाक्यैः काव्यस्योपादेयता आक्षिप्यते। क्रमेण एतेषां पूर्वपक्षाणां समाधानं विव्रियते।

१) असदर्थाभिधेयत्वान्नोपपदेष्टव्यं काव्यम् इति आक्षेपो न युज्यते। तथा हि काव्येषु शृङ्गारः प्रधानतया अप्रधानतया वा प्रकाश्यते। लक्षणग्रन्थेषु रसनिरूपणावसरे प्रथमं स निरूप्यते। रसराज इति च उच्यते। तत्र हेतुः स्पष्टः । सर्वेषां जनानां सुवेद्य इति कारणाल्लक्षणग्रन्थेषु प्रथमं तस्योपन्यासः, येन ते काव्याध्ययने अभिमुखा भवेयुरिति । आचार्य आनन्दवदनो वदति रसविरोधाविरोधविचारावसरे ध्वन्यालोके तृतीयोद्योते 'शृङ्गाररसो हि संसारिणां नियमेनानुभवविषयत्वात् सर्वरसेभ्यः कमनीयतया प्रधानभूतः' इति। न तावन्मात्रेण काव्यानां परमतात्पर्यं शृङ्गाराभिव्यञ्जने वर्तत इति मन्तव्यम्। शान्तस्य प्रकृतिरसत्वेनोपस्थापनात्। काव्यमार्गे तस्यैव पार्यन्तिकोऽनुभवः। शृङ्गारादयः प्रवृत्तिमार्गप्रवर्तका भवन्ति। शान्तश्च निवृत्तिमार्गप्रवर्तको भवति। यदाह मुनिर्भरतः

> न यत्र दुःखं न सुखं न चिन्ता न द्वेषो नापि मत्सरः।
> समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः॥
> भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।
> विकारः प्रकितेर्जातः पुनस्तत्रैव लीयते॥
> स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।
> पुनर्निमित्तापाये च शान्त एवोपलीयते॥ (ना.शा. ६.अन्ते)

आनन्दवर्धनेन तदेवमनुक्रमणीनिर्दिष्टेन वाक्येन भगवद्व्यतिरेकिणः सर्वस्यान्यस्यानित्यतां प्रकाशयता मोक्षलक्षण एवैकः परः पुरुषार्थः शास्त्रनये काव्यनये च तृष्णाक्षयसुखपरिपोषलक्षणः शान्तो रसः महाभारतस्याङ्गित्वेन विवक्षित इति सुप्रतिपादितम्। शाकुन्तलादावपि शकुन्तलादीनां शृङ्गारप्रधानानां रघुवंशादीनां वीरप्रधानानां महाभारतादीनां शान्तप्रधानानामन्येषां वा काव्यानां धर्मादिसदुपदेशे तात्पर्यमिति स्पष्टं भवति। नाट्यशास्त्रे नाट्योपलक्षणतया काव्यप्रयोजनमुक्तं यदत्र आक्षेपस्य समाधाने प्रमाणम्।

> धर्म्यमर्थ्यं यशस्यञ्च सोपदेशं ससङ्ग्रहम्।
> भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम्॥
> सर्वशास्त्रार्थसम्पन्नं सर्वशिष्यप्रवर्तकम्।
> नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्॥ (ना.शा.१.१४,१५)

२) ऋषिभिरप्रणीतत्वादनुपादेयं काव्यम् इति द्वितीय आक्षेपोऽपि न साधुः। तथा हि उक्तमादिकविना महर्षिणा वाल्मीकिना ।

> इतिहासपुराणाभ्यां वेदं समुपबृह्मयेत्।
> वेदोपबृम्हणार्थाय तावग्राहत प्रभुः॥ इति। (रामा.१.४.६)

किञ्च, वाल्मीकिव्यासप्रभृतिभिः परमकारुणिकैः महर्षिभिः काव्यस्य प्रणयनात् काव्यमुपादेयमिति ज्ञायते। 'नानृषिः कुरुते काव्यं ऋषिश्च किल दर्शनादिति' वचनेन एतद्दृढं भवति।

३) दृष्टप्रयोजनाभावान्नोपदेष्टव्यं काव्यम् इति न हृदयङ्गमम्। काव्यस्य दृष्टप्रयोजनमस्ति। काव्याद्यशः, अर्थः, व्यवहारज्ञानम्, सद्यःपरनिर्वृतिश्च सिद्ध्यति। काव्यं यशसेऽर्थकृते व्यवहारविदे इत्यादिवचनात्तद् ज्ञायते।

४) अदृष्टप्रयोजनाभावान्नोपदेष्टव्यं काव्यमिति न वक्तव्यम्। अस्ति काव्यस्यादृष्टप्रयोजनम्। तच्च स्वर्गापवर्गलक्षणम् ।उक्तम् आचार्येण भामहेन

> धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
> करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥ (काव्यालङ्कारः १.४)

साधुकाव्यनिषेवणमित्यनेन 'काव्यालापांश्च वर्जयेत्' इति वचनम् असाधुकाव्यव्यावर्तनपमेव इति ज्ञायते।

५) कल्पितार्थाभिदायित्वान्नोपदेष्टव्यं काव्यम्। काव्यं, कीर्तिः शुक्ला, प्रीतिः रक्ता इत्यादिमिथ्याभूतमर्थं बोधयति इत्याक्षेपः। तत्रेदं समाधानम्। वेदेषु अर्थवादवाक्यानि दृश्यन्ते। तेषामपि विधिप्राशस्त्यबोधकतया धर्मे प्रामाण्यमस्ति। तद्वत् मिथ्याभूतार्थपरतया विद्यमानानामपि काव्यवाक्यानां सदुपदेशजनकत्वेन उपादेयत्वमभ्युपगन्तव्यम्।

६) असदर्थाभिधायित्वान्नोपदेष्टव्यं काव्यमिति न वक्तव्यम्। असतोऽपि तस्य तत्त्वोपयोगितया कविभिर्वर्णितत्वात्। सदर्थाभिदायित्वादेव स्तोत्रकाव्येषु शङ्करभगवत्पादानां, सरसकाव्यरचनायां कालिदासादीनां, लक्षणग्रन्थेषु दार्शनिकानाम् अप्पयदीक्षितानां, काव्यप्रकाशग्रन्थव्याख्याने सरस्वतीतीर्थानामन्यत्र अन्येषाञ्च प्रवृत्तिः सङ्गच्छते। किञ्च

> यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः।
> ब्रह्मोद्याश्च कथाः कुर्यात्पितॄणामेतदीप्सितम्॥
> स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि।
> आख्यानानीतिहासांश्च पुराणानि खिलानि च॥ (मनु ३.२३१.२३२)

परमात्मनिरूपणपराः कथाः, महाभारतादीन् इतिहासान् पितृकर्मणि ब्राह्मणान् श्रावयेदिति स्मृतिकारो ब्रवीति।

कथादीनां प्राशस्त्यं लोके अस्तीति, सुपुरुषचरितस्य काव्यस्योपादेयत्वं सूचितं भवति।
शास्त्रोपदेशद्वारा विवेकप्राप्तिर्भवति। सच्छास्त्रजन्मा हि विवेकलाभः। भारतीयानां काव्यानां मनोरञ्जनमात्रं न लक्ष्यम्। तेषामपि मन्दाधिकारिणां विवेकलाभ उद्देश्यम्। शास्त्रेषु परिणतबुद्धयोऽधिकारिणो भवन्ति। तद्भिन्ना अपि लोके विद्यमाना जना विशिष्य सुकुमारमतय उद्धर्तव्या इत्यतो महर्षिभिः काव्यमार्गः समारब्धः । अतः मन्दमतयः काव्ये अधिकारिणः। यथोक्तम्

कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम्।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम्॥

असौ प्रायिको नियमः अन्येषामधिकारित्वं सामान्यसिद्धम्। काव्यं सदुपदिशति । तत्र रामायणविषये उच्यते-

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः।
शृण्वन् रामकथानादं को न याति परां गतिम्॥
इति।

तस्मात्कवयः सत्पुरुषचरितं रसगुणालङ्काररीतिभिर्मनोहरं काव्यं कृत्वा लोकोपकारका भवन्ति।
उत्तररामचरिते नाटके पूर्वमीमांसोत्तरमीमांसायोगदर्शनानां धर्मशास्त्रादीनाञ्च विचारः भवभूतिना कान्तासम्मिततया उपदिष्टः वर्तते। आदौ मङ्गलाचरणश्लोके वेदान्तविचारः समानीतः।

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।
वन्देमहि च तां वाणीममृतामात्मनः कलाम्॥
(उ.रा. १.१)

अमृतामात्मनः कलाम् इति पदं प्रयुक्तम् । अमृताम् शाश्वतीं, आत्मनः परमात्मनः, कलां अंशं वन्देमहि। अत्र वाल्मीकिकविवाणी रामायणं काव्यं वन्द्यते । सा वाणी परमात्मनः अंशः। विष्णुपुराणे उक्तम्

काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः॥
(वि.पु.१.२२.८४)

इति। किञ्च अमृतशब्दस्य मोक्ष इत्यर्थः वर्तते। अमृतं अस्यास्तीति अमृता, ताम् । अत्र मत्वर्थीयः अच् प्रत्ययः। वाल्मीकिकविवाणी रामायणं मोक्षस्य प्रयोजकम्। अमृतां मोक्षवतीम्, आत्मनः परमात्मनः प्रतिपादिकां कलाशब्दस्य विद्या इत्यर्थः। 'विद्यायां कालभेदे च मुक्तौ शिल्पे कलेति च' इति वैजयन्तीकोषात्। एवञ्च परमात्मप्रतिपादिकां रामायणरूपामध्यात्मरामायणरूपां वाणीं वन्देमहीत्यर्थः वेदान्तदर्शनपरः।
जनकः अयोध्यायां कानिचितद् दिनानि उषित्वा विदेहान् गतः। ततः दुःखितायाः जानक्याः दुःखमपनोदयन् तां प्रति 'देवि! वदेहि! समाश्वसिहि। ते हिगुरवो नश्क्नुवन्ति विहातुम् अस्मान्।

किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता' ॥इति।
(उ.रा.१.८)

अत्र अनुष्ठाननित्यत्वमिति मीमांसाशास्त्रीयो विषयः। कर्माणि नित्यनैमित्तिककाम्य-निषिद्धाख्यानि चतुर्विधानि। तत्र नित्यकर्मणाम् अनुष्ठाननित्यत्वमुक्तम्। 'अहरहः सन्द्ध्यामुपासीत' 'यावजीवमग्निहोत्रं जुहुयात्' इत्यादिश्रुतयः नित्यकर्मणां सन्ध्यावन्दनाग्निहोत्रादीनां नित्यत्वं प्रतिपादयन्ति। एतेषाम् अनुष्ठानेन किं फलमिति चेत् न किमपि फलम्। किन्तु अकरणेन प्रत्यवायो भवति। अतः नित्यकर्माननुष्ठानेन अग्निहोत्रिणां गृहस्थाश्रमधर्मलोपो भवतीति भवभूतिना सूचितम्।
दुर्मुखः 'उपस्तुवन्ति देवम् पौरजानपदाः विस्मारिता वयं महाराजदशरथस्य रामभद्रेणेति' इति वदति । तदा रामः 'अर्थवाद एषः। दोषन्तु मे कश्चित्कथय येन सप्रतिविधीयते' इति वदति। अर्थवादः मीमांसादर्शने पारिभाषिकः । विधेयस्य स्तुतिपरं वाक्यमिति तस्यार्थः। वायुर्वै क्षेपिष्ठा देवता इति श्रुत्या वायुः शीघ्रगामी इत्युच्यते। अत्र प्रत्यक्षप्रमाणसिद्धस्य अर्थस्य अनुवादमात्रम्।

नियोजय यथाधर्मं प्रियां त्वं धर्मचारिणीम्।
हिरण्मय्याः प्रतिकृतेः पुण्यां प्रकृति मध्वरे॥
(उ.रा.७.१९)

इति सप्तमेऽङ्के अरुन्धती, प्रतिकृतिं विहाय बिम्बभूतां सीतां अध्वरे नियोजय इति वदति। यजमानः रामः सीतायाः प्रतिकृत्या सह अश्वमेधमारब्धवान्। उभयथापि यज्ञे पत्न्याः अनिवार्यतां मीमांसादर्शनानुसारिणीं प्रतिपादयति भवभूतिः।
चित्रदर्शनावसरे रामस्य जटासंयमनवृत्तान्तसूचकं चित्रं पश्यन् लक्ष्मणः वदति-

पुत्रसङ्क्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिर्धृतम्।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम्॥
(उ.रा.१.२२)

सूर्यवंशीयाः राजानः वृद्धावस्थायां पुत्रे राज्याधिकारं दत्वा वानप्रस्थाश्रमं गच्छन्ति स्म ।
एषः धर्मः । इक्ष्वाकवः वार्धके यदारण्यकं व्रतमनुतिष्ठन्ति स्म आर्येन रामेण तद् बाल्ये एवनुष्ठितम् इति कथनस्य आशयः । एतद्व्रतमनुष्ठेयम् इति शास्त्रविधानमस्ति। उक्तञ्च याज्ञवल्क्यस्मृतौ

सुतविन्यस्तपत्नीकस्तया वानुगतो वनम्।
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥
इति।

इक्ष्वाकुवंशीयानां राज्ञाम् असौ आश्रमधर्मः कालिदासेनापि रघुवंशे 'वार्धके मुनिवृत्तीनाम्' इत्युक्तम्। भवभूतिः वानप्रस्थनियमं विवृणोति तत्रैव दक्षिणारण्यप्रवेशचित्रदर्शनावसरे।

एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि।
येष्वातिथेयपरमा यमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि॥ (उ.रा.१.२५)

पर्वतात्प्रवहन्त्या नद्यास्तीरेषु वृक्षाणां मध्ये तपोवनानि सन्ति। तत्र वानप्रस्थाश्रमिणः वसन्ति । अत्र कविना वानप्रस्थनियमः सूचितः । वैखानसः ,आतिथेयपरमाः, यमिनः, नीवारमुष्टिपचनाः, गृहिणः यमिनः इत्येते शब्दाः तन्नियमं निरूपयन्ति। वैखानसशब्दस्य वानप्रस्थ इत्यर्थः । विखनसा उपदिष्टमार्गानुसारी आश्रमः । अत्र गौतमधर्मसूत्रस्य हरदत्तटीका एवमस्ति 'वैखानसो वानप्रस्थः। विखनसा प्रोक्तेन मार्गेन वर्तत इति । तेन हि स आश्रमः प्राधान्येन प्रतिपादितः'इति । (गौ.ध.सू.३.२ हर.टीका) एवमेव यमिनः इत्यनेन अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहाख्यानां यमानाम् आचरणशीलाः इति योगमार्गानुसरणं सूचितम्। पुनः आतिथेयपरमाः - अतिथिसत्कारपराः, नीवारमुष्टिपचनाः – मुष्टिपरिमितान्नपाचकाः, गृहिणः - पत्न्या सह धृतवानप्रस्थधर्माणः । इत्येवं वानप्रस्थनियमान् अत्र भवभूतिः सूचितवान्।

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते॥
(उ.रा.१.३९)

चित्रदर्शनेन शान्तां निद्राणवत्याः सीतायाः शरीरं परामृशता रामेण सुखदुःखयोरेकरूपं दाम्पत्यमत्र प्रार्थ्यते। अस्मिन् पद्ये अद्वैतं, आवरणात्ययात् इति पदद्वयं अद्वैतदर्शनसम्बद्धम्। यद्यपि साक्षात् वेदान्तसिद्धान्तः अत्र नोक्तः तथापि जीवब्रह्मणोरैक्ये अज्ञानरूप-आवरणभङ्गस्य अपेक्षा अस्तीति विषयः सूचितः।
सञ्चितस्य कर्मणः भोगाय आत्मा शरीरं धरति इति वेदान्तसिद्धान्तः। दुर्मुखवचनश्रवणेन मूर्छितो रामः जागरितः सन् कथयति।

दुःखसंवेदनायैव रामे चैतन्यमागतम्।
मर्मोपघातिभिः प्रानैर्वज्रकीलायितं हृदि॥
(उ.रा.१.४७)

इति।
द्वितीयेङ्के 'अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति' इति आत्रेय्याः वनदेवतां प्रति कथनमस्ति। उद्गीथविदः उद्गीथं विदन्तीति। ओंकाररूपित्रिगुणात्मकैकाक्षरब्रह्म इति उद्गीथपदस्यार्थः। छान्दोग्ये 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति वचनात्।

यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च सम्पदः।
वैराजा नाम ते लोकास्तेजसा सन्तु ते शिवाः॥
(उ.रा.२.१२)

इति रामः शम्भूकं प्रति वदति। आत्मानुभवजन्यसुखप्राप्तिस्थानं वैराजनामकं लोकं प्राप्नोत्वित्यर्थः। वैराजलोकः ब्रह्मलोकः। तत्प्राप्तौ पुनः शरीरधारणक्लेशो न भवतीति। तल्लोकस्य गमनमार्गोऽपि रामेन उक्तः 'शिवास्ते पन्थानो देवयानाः' इति। निष्कामभावेन तपःकृत्वा प्राप्तात्मज्ञानः देवयानेन पथा ब्रह्मलोकं गच्छतीति छान्दोग्योपनिषदि उक्तम्।
अन्यदपि 'नूनं सङ्कल्पाभ्यासपाटवोपादान एष रामभद्रस्य भ्रमः' इति छायाङ्के रामस्य वचनम्। सीतायाः स्पर्शः जातः किन्तु सा न दृश्यते । तर्हि भ्रमएव । निरन्तरचिन्तनेन चिन्तिततस्य पदार्थस्य विद्यमानत्वेन जायमानः भ्रमः अत्र सूचितः।

दलति हृदयं गाडोद्वेगं द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्॥
(उ.रा.३.३१)

सीताविरही रामः वदति। अत्ररामस्य विरहशोकः प्रतिपादितः । भवशोके निमग्नस्यापि एतादृशाः भावा जायन्ते । क्षणे क्षणेऽन्यथाभूता धीविकल्पा जायन्ते इति शङ्करभगवत्पादैः लघुवाक्यवृत्तौ प्रतिपादितम्।

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक्पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारा-
नम्भो यथा सलिलमेव तु तत्समग्रम्॥ (उ.रा.३.४७)

तमसाया वचनम्। अत्रापि कविना वेदान्तविचारः समानीतः। यथा एकमेव ब्रह्म मायोपाधिकं सत् नानारूपाणि आप्नोति, तथा एक एव करुणरसः उपाधिभेदात् तद्याञ्जकविभावादिविशेषात् शृङ्गारादिनानारसात्मतां आप्नोति इति । एवं

विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्तानां क्वापि प्रविलयः कृतः॥ (उ.रा.६.६)

लवचन्द्रकेत्वोः युद्धप्रसङ्गं वर्णयन् विद्याधरः वदति। चन्द्रकेतुप्रयुक्तवायव्यास्त्रजनितेन वायुना लवप्रयुक्तवारुणास्त्रजनितानां अतात्विकानां मेघानां कुत्रचित् प्रदेशे लयः सञ्जातः। कथमिति उपमानं ददाति। यथा आत्मज्ञानेन अतात्विकानां सकलनामरूपादिप्रपञ्चानां ब्रह्मणि लयो भवति इति वेदान्तविचारः प्रस्तुतः।
एवम् उत्तरामवरिते नाटके दार्शनिकाः अनेके विचाराः प्रतिपादिताः सन्ति।

**परिशीलितग्रन्थाः**


1. उत्तरामचरितम्
2. जीवन्मुक्तविवेकः
3. वेदन्तसारः
4. विवेकचूडामणिः
5. रामायणम्
6. काव्यालङ्कारः
7. मनुस्मृतिः

८ण नाट्यशास्त्रम्